श्रीविद्यालघुपूजा

वर्धनी शङ्ख

बलि

घुतदीपं

तैलदीपं

श्री ज्ञान प्रकाशन



॥ दुर्गासूक्तम् ॥

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ १ ॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ २ ॥

अग्ने त्वं पारयानव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ ३ ॥

विश्वानि नो दुर्गहा जातवेदस्सिन्धुं न नावा दुरितातिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ ४ ॥

पृतनाजितँ सहमानमुग्रमग्निꣳ हुवेम परमाथ्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरितात्यग्निः ॥ ५ ॥

प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ ६ ॥

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्रविष्णोरनुसंचरेम ।
नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोक इह मादयन्ताम् ॥ ७ ॥

श्रीविद्यालघुपूजा



श्री ज्ञान प्रकारान

७, फ्लॉट नं, ३७७, ३०वीं गली, सेक्टर ६,
के. के. नगर, चेन्नै - ३०० ०७८.
फोन : २४७४०००१

2008 - 25.00

।। श्रीसूक्तम् ।।

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।। १ ।। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।। २ ।। अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ।। ३ ।। कां सोस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।। ४ ।। चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ।। ५ ।।

आदित्यमर्षेण तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ।। ६ ।। उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।। ७ ।। क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ।। ८ ।। गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।। ९ ।। मनसः काममाकूतिं वाचस्सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।। १० ।।

कर्दमेन प्रजाभूता मयि संभव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।। ११ ।। आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरँ श्रियं वासय मे कुले ।। १२ ।। आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्यां

हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।। १३ ।। आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।। १४ ।। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ।। १५ ।।

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ।। पद्मानने पद्मऊरु पद्माक्षी पद्मसंभवे । तन्मे भजसि पद्माक्षी येन सौख्यं लभाम्यहम् ।। अश्वदायी गोदायी धनदायी महाधने । धनं मे जुषतां देवि सर्वकामांश्च देहि मे ।। पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायदाक्षि । विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ।। पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवेरथम् । प्रजानां भवसी माता आयुष्मन्तं करोतु मे । धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ।। वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ।। न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृत पुण्यानां भक्तानां श्रीसूक्तं जपेत् । सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ।। विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ।। महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ।। श्रीर्वर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते । धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ।।

।। इति श्रीसूक्तम् ।।

———

।। भावनोपनिषत् ।।

ओं भद्रं कर्णेभिरिति शान्तिः ।।

हरिः ॐ । आत्मानमखण्डमण्डलाकारमावृत्य सकल-ब्रह्माण्डमण्डलं स्वप्रकाशं ध्यायेत् । श्रीगुरुः सर्वकारणभूता शक्तिः ।। १ ।। तेन नवरन्ध्ररूपो देहः ।। २ ।। नवचक्ररूपं श्रीचक्रम् ।। ३ ।। वाराही पितृरूपा कुरुकुल्ला बलिदेवता माता ।। ४ ।। पुरुषार्थाः सागराः ।। ५ ।। देहो नवरत्नद्वीपः ।। ६ ।। त्वगादि-सप्तधातुरोमसंयुक्तः ।। ७ ।। संकल्पाः कल्पतरवस्तेजः कल्पको-द्यानम् ।। ८ ।। रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवण-रसाः षड्ऋतवः ।। ९ ।। ज्ञानमर्घ्यं ज्ञेयं हविर्ज्ञाता होता ज्ञातृज्ञा-नज्ञेयानामभेदभावनं श्रीचक्रपूजनम् ।। १० ।। नियतिः शृङ्गा-रादयो रसा अणिमादयः ।। ११ ।। कामक्रोधलोभमोहमदमात्स-र्यपुण्यपापमया ब्राह्म्याद्यष्ट शक्तयः ।। १२ ।। आधारनवकं मुद्राश-क्तयः ।। १३ ।। पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राण-वाक्पाणिपादपायूपस्थानि मनोविकारः कामाकर्षिण्यादिषोडश शक्तयः ।। १४ ।। वचनादानगमनविसर्गानन्दहानोपादानोपेक्षा-ख्यबुद्धयोऽनङ्गकुसुमाद्यष्टौ ।। १५ ।। अलम्बुसा कुहूश्चोदरा वारणा हस्तिजिह्वा यशोवती पयस्विनी गान्धारी पूषा शङ्खिनी सरस्वतीडा पिङ्गला सुषुम्ना चेति चतुर्दश नाड्यः सर्वसक्षो-भिण्यादिचतुर्दश शक्तयः ।। १६ ।। प्राणापानव्यानोदान-समाननागकूर्मकृकरदेवदत्तधनञ्जया दश वायवः सर्वसिद्धि-प्रदादिबहिर्दशारदेवताः ।। १७ ।। एतद्वायुसंसर्गकोपाधिभेदेन रेचकः पाचकः शोषको दाहकः प्लावक इति प्राणमुख्यत्वेन पञ्चधा जठराग्निर्भवति ।। १८ ।। क्षारक उद्गारक क्षोभको-जृम्भको मोहक इति नागप्राधान्येन पञ्चविधास्ते मनुष्याणां

देहगा भक्ष्यभोज्यचोष्यलेह्यपेयात्मकपञ्चविधमन्नं पाचायन्ति ।। १९ ।। एता दश वह्निकलाः सर्वज्ञाद्या अन्तर्दशारदेवताः । ।। २० ।। शीतोष्णसुखदुःखेच्छाः सत्त्वं रजस्तमो वशिन्यादि-शक्तयोऽष्टौ ।। २१ ।। शब्दादितन्मात्राः पञ्च पुष्पबाणाः ।। २२ ।। मन इक्षुधनुः ।। २३ ।। रागः पाशः ।। २४ ।। द्वेषोङ्कुशः। ।। २५ ।। अव्यक्तमहदहङ्काराः कामेश्वरीवज्रेश्वरीभगमालिन्योऽन्तस्त्रिकोणगा देवताः ।। २६ ।। निरुपाधिकसंविदेव कामेश्वरः ।। २७ ।। सदानन्दपूर्णः स्वात्मैव परदेवता ललिता ।। २८ ।। लौहित्यमेतस्य सर्वस्य विमर्शः ।। २९ ।। अनन्यचित्तत्वेन च सिद्धिः ।। ३० ।। भावनायाः क्रिया उपचारः ।। ३१ ।। अहं त्वमस्ति नास्ति कर्तव्यमकर्तव्यमुपासितव्यमिति विकल्पानामात्मनि विलापनं होमः ।। ३२ ।। भावनाविषयाणामभेदभावना तर्पणम् ।। ३३ ।। पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनम् ।। ३४ ।। एवं मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावनापरो जीवन्मुक्तो भवति स एव शिवयोगीति गद्यते ।। ३५ ।। कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः ।। ३६ ।। य एवं वेद सोऽथर्वशिरोऽधीते ।। ३७ ।। इत्युपनिषत् ।।

ओं भद्रं कर्णेभिरिति शान्तिः ।। हरिः ओं तत्सत् ।।

।। इति भावनोपनिषत् ।।

———

श्री गणेशाय नमः

॥ गणपत्यथर्वशीर्षोपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः। व्यशेम देवहितं यदायुः। स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ ॐ शान्तिः शान्तिः शान्तिः॥

अथ गणेशाथर्वशीर्षं व्याख्यास्यामः॥ ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्मासि नित्यम्॥ १॥ ऋतं वच्मि। सत्यं वच्मि॥ २॥ अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्॥ ३॥

त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि॥ ४॥ सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि

वाक्पदानि ॥ ५ ॥ त्वं गुणत्रयातीतः । त्वं देहत्रयातीतः । त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ ६ ॥

गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् । तारेण रुद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् । अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः संधानम् । सꣳहिता संधिः । सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्री छन्दः । गणपतिर्देवता ॥ ॐ गं गणपतये नमः ॥ ७ ॥ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥ ८ ॥ एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लम्बोदरं शूर्पकर्णक रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ ९ ॥ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्ते अस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ १० ॥

एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते । स सर्वतः सुखमेधते । स सर्वविघ्नैर्न बाध्यते । स पञ्चमहापापात्प्रमुच्यते ।

सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायंप्रातः प्रयुञ्जानो अपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति ॥ इदमथर्वशीर्षमशिष्याय न देयम् ॥ यो यदि मोहाद्दास्यति । स पापीयान् भवती । सहस्रावर्तनात् । यं यं काममधीते । तं तमनेन साधयेत् ॥ ११ ॥ अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति । चतुर्थ्यामनश्नन् जपति । स विद्यावान्भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्याचरणं विद्यात् । न बिभेति कदाचनेति ॥ १२ ॥ यो दूर्वाङ्कुरैर्यजति । स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान्भवति । स मेधावान्भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते । अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा । सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासंनिधौ वा जप्त्वा । सिद्धमन्त्रो भवति । महाविघ्नात्प्रमुच्यते । महादोषात्प्रमुच्यते । महापापात्प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति । य एवं वेद ॥ इत्युपनिषत् ॥ १३ ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ भद्रं कर्णेभिः० ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

॥ इति गणपत्यथर्वशीर्षं समाप्तम् ॥

श्रीः

।। श्रीविद्यालघुपूजा ।।

आब्रह्मलोकादाशेषादालोकालोकपर्वतात् ।
ये वसन्ति द्विजा देवास्तेभ्यो नित्यं नमाम्यहम् ।।

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यः । सर्वोपप्लवरहितप्रज्ञानघन - प्रत्यगर्थो ब्रह्माहमस्मि, सोऽहमस्मि ब्रह्माहमस्मि ।।

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवम्
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रम मण्डलम् ।
वीरान्द्व्यष्टचतुष्कषष्टिनवक वीरावलीपञ्चक
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ।।

ऐंकारह्रींकाररहस्ययुक्त
श्रींकारगूढार्थ - महाविभूत्या ।
ओंकारमर्मप्रतिपादिनीभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

ओं ऐं ह्रीं श्रीं भं भद्रकाल्यै नमः (दक्षभागे)
,, भं भैरवाय नमः (वामभागे)
,, लं लम्बोदराय नमः (ऊर्ध्वभागे)

इति द्वारदेवताः संपूज्य ।।

ओं ऐं ह्रीं श्रीं ऐं कएईलह्रीं आत्मतत्त्वं शोधयामि स्वाहा ।

,, क्लीं हसकहलह्रीं विद्यातत्त्वं ,, ,,

,, सौः सकलह्रीं शिवतत्त्वं ,, ,,

,, ऐं कएईलह्रीं क्लीं हसकहलह्रीं सौः सकलह्रीं सर्वतत्त्वं शोधयामि स्वाहा ।। इत्याचम्य—

ओं ऐं ह्रां श्रीं, ऐं क्लीं सौः, हंसः शिवः सोहं, ह्स्ख्फ्रें हसक्षमलवरयूं ह्सौः सहक्षमलवरयीं स्हौः हंसः शिवः सोहं स्वरूपनिरूपणहेतवे श्रीगुरवे नमः अमुकानन्दनाथ श्रीपादुकां पूजयामि नमः ।।

ओं ऐं ह्रीं श्रीं ऐं क्लीं सौः, सोहं हंसः शिवः ह्स्ख्फ्रें हसक्षमलवरयूं ह्सौः सहक्षमलवरयीं स्हौः सोहं हंसः शिवः स्वच्छप्रकाशविमर्शहेतवे श्रीपरमगुरवे नमः, अमुकानन्दनाथ श्रीपादुकां पूजयामि नमः ।।

ओं ऐं ह्रीं श्रीं, ऐं क्लीं सौः, हंसः शिवः सोहं हंसः ह्स्ख्फ्रें हसक्षमलवरयूं हसौः सहक्षमलवरयीं स्हौः हँसः शिवः सोहं हंसः स्वात्मारामपञ्जरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः अमुकानन्दनाथ - श्रीपादुकां पूजयामि नमः ।।

इति मृगीमुद्रया गुरुपादुकामुच्चार्य, सुमुख-सुवृत्त-चतुरश्र-मुद्गर - योन्याख्याभिः पञ्चभिर्मुद्राभिः श्रीगुरून् वामभुजे प्रणम्य, गणपतिमूलेन स्वदक्षभुजे योनिमुद्रया महागणपति प्रणमेत् ।।

आगमार्थं च देवानां गमनार्थं तु रक्षसाम् ।
कुर्याद् घण्टारवं तत्र देवताह्वानलाञ्छनम् ।।

इति घण्टानादं कृत्वा ।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

मूलेन प्राणानायम्य । देशकालौ सकीर्त्य—

श्रीललितामहात्रिपुरसुन्दरीप्रीति - द्वारा सकुटुम्बस्य मम चतुर्विधपुरुषार्थसिद्धयर्थं यथासंभवद्रव्यैः यथाशक्ति सपर्याक्रमं निर्वर्तयिष्ये ।

आत्मानं गन्धपुष्पादिभिरलंकृत्य प्रमुदितचित्तः शिवोऽहं इति भावयेत् ।।

आसनमास्तीर्य दक्षिणहस्ते जलमादाय सौः इति द्वादशवारमभिमन्त्र्य तज्जलेन मूलमन्त्रमुच्चरन् आसनं प्रोक्षयेत् ।।

ओं ऐं ह्रीं श्रीं ओं ह्रीं आधारशक्तिकमलासनाय नमः ।

इति पुष्पाक्षतैः आसनमभ्यर्च्य आसने उपविशेत् ।।

ओं ऐं ह्रीं श्रीं रक्तद्वादशशक्तियुक्ताय द्वीपनाथाय नमः ।

इति भूमौ पुष्पाञ्जलिं विकिरेत् ।।

,, **समस्तप्रकट गुप्त - गुप्ततर - संप्रदाय - कुलोत्तीर्ण - निगर्भ-रहस्यातिरहस्य - परापरातिरहस्ययोगिनीभ्यो नमः ।**

इति मूर्ध्नि बद्धाञ्जलिः ।।

४ ऐं ह्रः अस्त्राय फट्—इति अस्त्रमन्त्रेण करतलयोः देहे च व्यापकं कुर्यात् ।

,, श्रीगुरो दक्षिणामूर्ते भक्तानुग्रहकारक !
अनुज्ञां देहि भगवन् श्रीचक्रयजनाय मे ।। इत्यनुज्ञाप्य

,, ओं आं ह्रीं क्रों यं रं लं वं शं षं सं हं ओं हंसः सोहं, सोहं हंसः शिवः, श्रीचक्रस्य प्राणा इह प्राणाः

,, ओं आं ह्रीं क्रों श्रीचक्रस्य जीव इह स्थितः । सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणा इहैवागत्य अस्मिन् चक्रे सुखं चिरं तिष्ठन्तु स्वाहा ।।

,, असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृळया नस्स्वस्ति ।

इति लघुप्राणप्रतिष्ठा ।

ओं ऐं ह्रीं श्रीं अमृताम्भोनिधये नमः

,, रत्नद्वीपाय नमः

,, कल्पादिककदम्बान्तवाटिकाषट्काय नमः

,, पुष्परागादिविद्रुमान्तनवरत्नप्राकारेभ्यो नमः

,, माणिक्यमण्टपाय नमः

,, सहस्रस्तम्भमण्टपाय नमः

,, अमृतादिवापिकात्रयाय नमः

४ बालातपोद्गाराय नमः
,, चन्द्रिकोद्गाराय नमः
,, महाशृङ्गारपरिघायै नमः
,, महापद्माटव्यै नमः
,, चिन्तामणिमयगृहराजाय नमः
,, चतुराम्नायमयचतुर्द्वारेभ्यो नमः
,, रत्नप्रदीपवलयाय नमः
,, मणिमयमहासिंहासनाय नमः
,, पञ्चब्रह्ममयमञ्चाय नमः
,, हंसतूलिकातल्पाय नमः
,, हंसतूलिकामहोपधानाय नमः
,, कौसुम्भास्तरणाय नमः
,, महावितानकाय नमः
,, महामायायवनिकायै नमः

॥ इति मन्दिरपूजा ॥

दीपदेवि महादेवि शुभं भवतु मे सदा ।
यावत्पूजासमाप्तिः स्यात्तावत्प्रज्वल सुस्थिरा ॥

इति दीपे पुष्पाञ्जलिं दद्यात् ॥

मूलेन चक्रमध्ये पुष्पाञ्जलिं विकीर्य, मूलत्रिखण्डेन स्वाग्र-वामदक्षकोणेषु पुष्पाञ्जलीन् दद्यात् ॥

॥ भूतशुद्धिः ॥

श्वाससमीरं पिङ्गलया अन्तराकृष्य—

४ मूलशृङ्गाटकात् सुषुम्नापथेन जीवशिवं परमशिवपदे योजयामि स्वाहा—इति मन्त्रेण मूलाधारस्थितं जीवात्मानं

सुषुम्नावर्त्मना ब्रह्मरन्ध्रं नीत्वा परमशिवेन एकीभूतं विभाव्य इडया वायुं रेचयेत् ।।

४ यं १६. (इडया पूरयित्वा) **संकोचशरीरं शोषय शोषय स्वाहा**—इति निजशरीरं शोषितं विभाव्य पिङ्गलया रेचयेत्

४ रं १६. (पिङ्गलया पूरयित्वा) **संकोचशरीरं दहदह पचपच स्वाहा**—इति ष्लुष्टं भस्मीकृतं च विभाव्य इडया रेचयेत्

४ वं १६. (इडया पूरयित्वा) **परमशिवामृतं वर्षय वर्षय स्वाहा**—इति तद्भस्म सहस्रारेन्दुमण्डलविगलदमृतरसेन सिक्तं च विभाव्य पिङ्गलया रेचयेत् ।।

४ लं १६. (पिङ्गलया पूरयित्वा) **शाम्भवशरीरमुत्पादयोत्पादय स्वाहा**—इति तद्भस्मनो दिव्यशरीरमुत्पन्नं विभाव्य इडया रेचयेत् ।।

४ हंसः सोहं (इडया पूरयित्वा) **अवतर अवतर शिवपदात् जीव सुषुम्नापथेन प्रविश मुलभृङ्गाटकं उल्लसोल्लस ज्वल ज्वल प्रज्वल प्रज्वल हंसः सोहं स्वाहा**—इति परमशिवेनैकीकृतं जीवं पुनः सुषुम्नावर्त्मना मूलाधारे स्थापितं चिन्तयेत् ।।

इति भूतशुद्धिः ।

अथ हृदि दक्षकरतलं निधाय **आं सोहं** इति त्रिः पठेत् ।।

इत्यात्मप्राणप्रतिष्ठां कृत्वा अथ मूलेन षोडशधा दशधा त्रिधा वा प्राणानायम्य ।।

७ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।

इति मन्त्रमुच्चार्य युगपद्वामपार्ष्णिभूतलाघातत्रयक्रूरदृष्ट्यवलोकनपूर्वकतालत्रयेण भौमान्तरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् ।।

अथ नमः इति अंगुष्ठमन्त्रमुच्चारयन् अंकुशमुद्रया शिखां बध्नीयात् ।।

मातृकान्यासः ।

अस्य श्रीमातृकासरस्वतीन्यासमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीमातृकासरस्वती देवता । हल्भ्यो बीजेभ्यो नमः, स्वरेभ्यः शक्तिभ्यो नमः, बिन्दुभ्यः कीलकेभ्यो नमः, मम श्रीविद्याङ्गत्वेन न्यासे विनियोगः ।।

सर्वमातृकया सर्वाङ्गे अञ्जलिना त्रिर्व्यापकं कुर्यात्

७ अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः
७ इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः
७ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः
७ एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः
७ ओं पं फं बं भं मं औं कनिष्ठकाभ्यां नमः
७ अं यं रं लं वं शं षं
सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां नमः

एवं हृदयादिन्यासः । भूर्भुवस्सुवरोम् इति दिग्बन्धः ।

---

७ = ऐं ह्रीं श्रीं ऐं क्लीं सौः

ध्यानम् ।

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणामब्जसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ।।

लमित्यादि पञ्चपूजां कृत्वा ।

बहिर्मातृकान्यासः ।

मातृकाः प्रणव-त्रितारीबालापूर्विकाः 'नमः हंसः' इत्यन्ताः स्वाङ्गेषु न्यसेत् ।

ओं ऐं ह्रीं श्रीं ऐं क्लीं सौः

७ अं नमः हंसः (शिरसि)
७ आं ,, (मुखवृत्ते)
७ इं ,, (दक्षनेत्रे)
७ ईं ,, (वामनेत्रे)
७ उं ,, (दक्षकर्णे)
७ ऊं ,, (वामकर्णे)
७ ऋं ,, (दक्षनासापुटे)
७ ॠं ,, (वामनासापुटे)
७ लृं ,, (दक्षकपोले)
७ लॄं ,, (वामकपोले)
७ एं नमः हंसः (ऊर्ध्वोष्ठे)
७ ऐं ,, (अधरोष्ठे)
७ ओं ,, (ऊर्ध्वदन्तपंक्तौ)
७ औं ,, (अधोदन्तपंक्तौ)
७ अं ,, (जिह्वाग्रे)
७ अः ,, (कण्ठे)
७ कं ,, (दक्षबाहुमूले)
७ खं ,, (दक्षकूर्परे)
७ गं ,, (दक्षमणिबन्धे)
७ घं ,, (दक्षकराङ्गुलिमूले)

ओं ऐं ह्रीं श्रीं ऐं क्लीं सौः

७ डं नमः हंसः (दक्षकराङ्गुल्यग्रे)
७ चं ,, (वामबाहुमूले)
७ छं ,, (वामकूर्परे)
७ जं ,, (वाममणिबन्धे)
७ झं ,, (वामकराङ्गुलिमूले)
७ ञं ,, (वामकराङ्गुल्यग्रे)
७ टं ,, (दक्षोरुमूले)
७ ठं ,, (दक्षजानुनि)
७ डं ,, (दक्षगुल्फे)
७ ढं ,, (दक्षपादाङ्गुलिमूले)
७ णं ,, (दक्षपादाङ्गुल्यग्रे)

७ तं नमः हंसः (वामोरुमूले)
७ थं ,, (वामजानुनि)
७ दं ,, (वामगुल्फे)
७ धं ,, (वामपादाङ्गुलिमूले)
७ नं ,, (वामपादाङ्गुल्यग्रे)
७ पं ,, (दक्षपार्श्वे)
७ फं ,, (वामपार्श्वे)
७ बं ,, (पृष्ठे)
७ भं ,, (नाभौ)
७ मं ,, (जठरे)
७ यं ,, (हृदये)
७ रं ,, (दक्षकक्षे)
७ लं ,, (गलपृष्ठे)

७ वं नमः हंसः (वामकक्षे)
७ शं ,, (हृदयादि-दक्षकराङ्गुल्यन्तं)
७ षं ,, (हृदयादि वामकराङ्गुल्यन्तं)
७ सं ,, (हृदयादि दक्षपादाङ्गुल्यन्तं)
७ हं ,, (हृदयादि वामपादाङ्गुल्यन्तं)
७ ळं ,, (कटयादिपादाङ्गुल्यन्तं)
७ क्षं ,, (कटयादिब्रह्मरन्ध्रान्तं)

इति बहिर्मातृकान्यासः ।

अन्तर्मातृकान्यासः ।

७ **अं नमः हंसः; आं नमः हंसः + + अः नमः हंसः ।।**

कण्ठे विशुद्धिचक्रे षोडशदलकमले ।

७ **कं नमः हंसः, खं नमः हंसः + + ठं नमः हंसः ।।**

हृदये अनाहते द्वादशदलकमले ।

७ **डं नमः हंसः, ढं नमः हंसः + + + फं नमः हंसः ।।**

नाभौ मणिपूरे दशदलकमले ।

७ **बं नमः हंसः, + + लं नमः हंसः ।।**

लिङ्गमूले स्वाधिष्ठाने षड्दलकमले ।

७ **वं नमः हंसः, शं नमः हंसः + + सं नमः हंसः ।।**

गुदोपरि मूलाधारे चतुर्दलकमले ।

७ **हं नमः हंसः, क्षं नमः हंसः ।**

भ्रुवोर्मध्ये आज्ञाचक्रे द्विदले ।

७ **अं नमः हंसः, आं नमः हसः + + क्षं नमः हंसः ।।**

(50 वर्णाः) मूर्ध्नि सहस्रारे ।

इति अन्तर्मातृकान्यासः ।

———

अथ मूलविद्यावर्णन्यासं ऋष्यादिकरषडङ्गन्यासं च यथोपदेशं कुर्यात् ।।

कलशपूजा ।



स्वपुरतो वामभागे त्रिकोणवृत्तचतुरश्रात्मकं मण्डलं मत्स्य मुद्रया विलिख्य, मण्डलं मूलेन समभ्यर्च्य, कर्पूरादिवासितजलपूरितं कलशं गन्धपुष्पाक्षतैरलंकृत्य मण्डलोपरि संस्थापयेत् ।।

ओं कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ।

ओं आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दा॑स्यापो ज्योती॑ष्यापो यजू॑ष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवस्सुवराप ओं ।।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु ।।

सर्वे समुद्राः सरितस्तीर्थानि च नदाः ह्रदाः ।
आयान्तु देवीपूजार्थं दुरितक्षयकारकाः ।।

मूलेन अष्टवारमभिमन्त्र्य, धेनुमुद्रां प्रदर्श्य, तज्जलेन पूजोपकरणानि आत्मानं च प्रोक्षयेत् ।।

शङ्खपूजा ।



वर्धनीपात्रस्य दक्षिणतः वर्धनीपात्रगतेन जलेन बिन्दुत्रिकोण-षट्कोण-वृत्त-चतुरश्रात्मकं मण्डलं मत्स्यमुद्रया निर्माय मूलेनाभ्यर्च्य—**ओं ऐं ह्रीं श्रीं अस्त्राय फट्**—इति शङ्खपात्रस्य आधारं प्रक्षाळय

४ **अं अग्निमण्डलाय धर्मप्रददशकलात्मने श्रीमहात्रिपुरसुन्दर्याः सामान्यार्घ्यपात्राधाराय नमः**—इति मण्डलस्योपरि संस्थाप्य

४ **अग्निं दूत वृणीमहे होतारं विश्ववेदसं । अस्य यज्ञस्य सुक्रतुम् रां रीं रूं रैं रौं रः रमलवरयूं अग्निमण्डलाय नमः**

इति अग्निमण्डलं विभाव्य

४ **धूम्रार्चिरादिदशकलाभ्यो नमः ।** इति संपूज्य

१ अस्त्राय फट्—इति क्षाळितं शङ्खं गृहीत्वा

४ उं सूर्यमण्डलायार्थप्रदद्वादशकलात्मने श्रीमहात्रिपुरसुन्दर्याः सामान्यार्घ्यपात्राय नमः—इति संस्थाप्य

४ आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेना देवो याति भुवना विपश्यन्। ह्रा ह्रीं ह्रूं ह्रैं ह्रौं ह्रः। हमलवरयूम्। सूर्यमण्डलाय नमः—इति सूर्यमण्डलं विभाव्य

४ तपिन्यादिद्वादशकलाभ्यो नमः—इति संपूज्य

४ मं सोममण्डलाय कामप्रद-षोडशकलात्मने महात्रिपुरसुन्दर्याः सामान्यार्घ्यामृताय नमः—इति वर्धनीसलिलमापूर्य

४ आप्यायस्व समेतु ते विश्वतः सोमवृष्णियं। भवावाजस्य संगथे। सां सीं सूं सैं सौं सः समलवरयूं सोममण्डलाय नमः—इति सोममण्डलं विभाव्य

४ अमृतादिदोषडशकलाभ्यो नमः—इति संपूज्य ततस्तस्मिन् शङ्खे अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च क्रमेण षडङ्गैः संपूजयेत्।

तद्यथा—

४ ऐं क-५ हृदयाय नमः। हृदयशक्तिश्रीपादुकां पूजयामि नमः

४ क्लीं ह-६ शिरसे स्वाहा। शिरःशक्तिश्री ,, ,, ,,

४ सौः स-४ शिखायैं वषट्। शिखाशक्तिश्री ,, ,, ,,

४ ऐं क-५ कवचाय हुम् । कवचशक्तिश्री ,, ,, ,,

४ क्लीं ह-६ नेत्रत्रयाय वौषट् । नेत्रशक्तिश्री ,, ,, ,,

४ सौः स-४ अस्त्राय फट् । अस्त्रशक्तिश्री ,, ,, ,,

ततः अस्त्राय फट् इति सरक्ष्य, कवचाय हुम् इति अवकुण्ठ्य, धेनुयोनिमुद्रे प्रदर्श्य, मूलेन सप्तवारमभिमन्त्र्य, तत्सलिलपृषतैः पूजोपकरणानि आत्मानं च प्रोक्ष्य, शङ्खजलात् किंचित् वर्धन्यां क्षिपेत् ।।

अन्तर्यागः ।

आमूलाधारादाब्रह्मबिलं विलसन्तीं विसतन्तुतनीयसीं विद्युत्पुञ्जपिञ्जरां विवस्वद्युतभास्वत्प्रकाशां परःशतसुधामयूखशीतलतेजोदण्डरूपां परचितिं भावयेत् । तेजोरूपेण परिणतां परमशिवज्योतिरभिन्नप्रकाशात्मिकां वियदादिविश्वकारणां सर्वावभासिकां स्वात्माभिन्नां परचितिं सुषुम्नापथेन उद्गमय्य विनिर्भिन्नविधिबिलविलसदमलशतदलकमलात् वह्न्यासापुटेन निर्गतां त्रिखण्डमुद्रामण्डितशिखण्डे कुसुमगर्भितेऽञ्जलौ समानीय—

४ ह्रीं श्रीं सौः श्रीललितायाः अमृतचैतन्यमूर्तिं कल्पयामि नमः ।। मूलमन्त्रध्यानश्लोकोक्तरूपेण देवीं निजलीलाङ्गीकृतललितवपुषं विचिन्त्य—

आवाहनम् ।

४ ह्स्रैं ह्स्क्लरीं ह्स्रौः

महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतहिते मातः एह्येहि परमेश्वरि ।।

बिन्दुपीठगतनिर्विशेषब्रह्मात्मक श्रीमत्कामेश्वराङ्के
श्रीललितामहात्रिपुरसुन्दरीमावाहयामि नमः ।।

४ मूलं आवाहिता भव ।।

४ ,, संस्थापिता भव ।।

४ ,, सनिधापिता भव ।।

४ ,, संनिरुद्धा भव ।।

४ ,, समुखी भव ।।

४ ,, अवकुण्ठिता भव ।।

इति मन्त्रैरावाहनादिषण्मुद्राः प्रदर्श्य, वन्दनधेनुयोनिमुद्राश्च प्रदर्शयेत् ।

अथ उपचारपूजा

४ श्रीललितायै पाद्य कल्पयामि नमः ।

,, आभरणावरोपणं कल्पयामि नमः

,, मज्जनशालाप्रवेशन कल्पयामि नमः

,, कनककलशच्युत-
सकलतीर्थाभिषेकं ,,

,, धौतवस्त्रपरिमार्जनं ,,

,, अरुणदुकूलपरिधानं ,,

,, अरुणकुचोत्तरीयं ,,

---

* इह त्रिपुरा-देवी-भावना-बहवृचोपनिषद्भिः श्रीसूक्तदुर्गासूक्ताभ्यां च यथावकाशं अभिषेकः कार्यः ।।

४ श्रीललितायै दिव्यगन्धसर्वाङ्गीणविलेपनं कल्पयामि नमः

,, केशभरस्य कालागरुधूपं ,,

,, मल्लिकादिसर्वर्तुकुसुममालाः ,,

,, नवमणिमुकुटादि सर्वाभरणानि ,,

,, एकरे पाशं ,,

,, अन्यकरेऽङ्कुशं ,,

,, इतरकरे पुण्ड्रेक्षुचापं ,,

,, अपरकरे पुष्पबाणान् ,,

,, श्रीमन्माणिक्यपादुके ,,

,, महाचक्राधिरोहणं ,,

,, कामेश्वराङ्कपर्यङ्कोपवेशनं ,,

चतुरायतन पूजा ।

४ गणपतिमूलं सिद्धलक्ष्मीसमेतमहागणपतिश्रीपादुकां
पूजयामि नमः—इति त्रिः ।

४ आदित्यमूलं प्रकाशशक्तिसहितमार्ताण्डभैरवश्रीपादुकां
पूजयामि नमः—इति त्रिः ।

४ अष्टाक्षरी श्रीमहालक्ष्मीसमेतमहाविष्णुश्रीपादुकां
पूजयामि नमः—इति त्रिः ।

४ पञ्चाक्षरी श्रीसाम्बपरमेश्वरश्रीपादुकां पूजयामि नमः-इति त्रिः

लयाङ्गपूजा ।

४ मूलं श्रीललितामहात्रिपुरसुन्दरी श्रीपादुकां पूजयामि नमः
इति बिन्दौ देवीं त्रिः संपूजयेत् ।

षडङ्गार्चनम् ।

देव्यङ्गे (बिन्दौ) अग्नीशामुरवायुकोणेषु मध्ये दिक्षु च

४ ऐं क-५ हृदयाय नमः । हृदयशक्तिश्रीपादुकां पू० नमः
४ क्लीं ह-६ शिरसे स्वाहा । शिरःशक्तिश्री० ,,
४ सौः स-४ शिखायै वषट् । शिखाशक्तिश्री० ,,
४ ऐं क-५ कवचाय हुं । कवचशक्तिश्री० ,,
४ क्लीं ह-६ नेत्रत्रयाय वौषट् । नेत्रशक्तिश्री० ,,
४ सौः स-४ अस्त्राय फट् । अस्त्रशक्तिश्री० ,,

नित्यादेवीयजनम् ।

४ अं ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः अं कामेश्वरीनित्या-
श्रीपादुकां पूजयामि नमः ।।

४ आं ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये
भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे
नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे
रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे
भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् महेश्वरि ऐं ब्लूं
जं ब्लूं भें ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे
वशमानय स्त्रीं हर ब्लें ह्रीं आं भगमालिनीनित्याश्री००

४ इं ओं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा इं नित्यक्लिन्नानित्याश्री०

४ ईं ओं क्रों श्रों क्रौं झ्रौं छ्रौं ज्रौं स्वाहा ईं भेरुण्डानित्याश्री०

४ उं ओं ह्रीं वह्निवासिन्यै नमः उं वह्निवासिनीनित्याश्री०

४ ऊं ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं ऊं महावज्रेश्वरीनित्याश्री०

४ ऋं ह्रीं शिवदूत्यै नमः ऋं शिवदूतीनित्याश्री०

४ ॠं ओं ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षें ह्रीं फट् ॠं त्वरितानित्याश्री०

४ लृं ऐं क्लीं सौः लृं कुलसुन्दरीनित्याश्री०

४ लॄं ह्स्क्ल्र्ड्ं ह्स्क्ल्र्ड्ीं ह्स्क्ल्र्ड्ौः लॄं नित्यानित्याश्री०

४ एं ह्रीं फ्रें स्त्रूं क्रों आं क्लीं ऐं व्लूं नित्यमदद्रवे हुं फ्रें ह्रों एं नीलपताकानित्याश्री०

४ ऐं भ्म्र्यूं ऐं विजयानित्याश्री०

४ ओं स्वौं ओं सर्वमङ्गळानित्याश्री०

४ औं ओं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूत संहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं र र र र र र र हुम् फट् स्वाहा औं ज्वालामालिनीनित्याश्री०

४ अं च्क्रौं अं चित्रानित्याश्री०

४ अः क-१५ अः ललितामहानित्याश्री०

गुरुमण्डलार्चनम् ।

४ परौघेभ्यो नमः इति बिन्दुत्रिकोणयोः पुष्पाञ्जलिं दत्त्वा बिन्दौ महापादुकां यजेत् ।। यथा—

४ ऐं ह्रीं श्रीं ऐं क्लीं सोः ऐं ग्लौं ह्रस्ख्फ्रें हसक्षमलवरयूं ह्रसौः सहक्षमलवरयीं स्हौः श्रीविद्यानन्दनाथात्मक श्री चर्यानन्दनाथ श्रीपादुकां पूजयामि नमः ।।

त्रिकोणे वामरेखायां

४ उड्डीशानन्दनाथश्रीपादुकां पूजयामि नमः
४ प्रकाशानन्दनाथ ,, ,,
४ विमर्शानन्दनाथ ,, ,,
४ आनन्दानन्दनाथ

पूर्वरेखायां—

४ षष्ठीशानन्दनाथ
४ ज्ञानानन्दनाथ
४ सत्यानन्दनाथ
४ पूर्णानन्दनाथ



दक्षरेखायां—

४ मित्रेशानन्दनाथ ,, ,,
४ स्वभावनन्दनाथ ,, ,,
४ प्रतिभानन्दनाथ ,, ,,
४ सुभगानन्दनाथ ,, ,,

४ दिव्यौघसिद्धौघमानवौघेभ्यो नमः—इति पुष्पाञ्जलिः—

दिव्यौघः

४ परप्रकाशानन्दनाथ श्रीपादुकां पूजयामि नमः
४ परशिवानन्दनाथ ,, ,,
४ पराशक्त्यम्बा ,, ,,
४ कौलेश्वरानन्दनाथ ,, ,,
४ शुक्लदेव्यम्बा ,, ,,
४ कुलेश्वरानन्दनाथ ,, ,,
४ कामेश्वर्यम्बा ,, ,,

सिद्धौघः—

४ भोगानन्दनाथ ,, ,,
४ विलासानन्दनाथ ,, ,,
४ समयानन्दनाथ ,, ,,
४ सहजानन्दनाथ ,, ,,

मानवौघः—

४ गगनानन्दनाथ ,, ,,
४ निश्चानन्दनाथ ,, ,,
४ विमलानन्दनाथ ,, ,,
४ मदनानन्दनाथ ,, ,,

४ भुवनानन्दनाथ श्रीपादुकां पूजयामि नमः
४ लीलाम्बा ,, ,,
४ स्वात्मानन्दनाथ ,, ,,
४ प्रियानन्दनाथ ,, ,,

ततः परमेष्ठिगुरुमन्त्रेण परमेष्ठिगुरुं, परमगुरुमन्त्रेण परमगुरुं, स्वगुरुमन्त्रेण स्वगुरुं च यजेत् ।।

४ अं आं सौः— चतुरश्रत्रयात्मकत्रैलोक्यमोहनचक्राधिष्ठात्र्यै अणिमाद्यष्टाविंशतिशक्तिसहित - प्रकटयोगिनीमयूखावृत - त्रिपुराचक्रेश्वरीस्वरूप श्रीललितामहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि नमः

४ ऐं क्लीं सौः षोडशदलपद्मात्मकसर्वाशापरिपूरक-चक्राधिष्ठात्र्यै कामाकर्षण्यादिषोडशशक्तिसहित - गुप्तयोगिनीमयूखावृत - त्रिपुरेशीचक्रेश्वरीस्वरूप श्रीललितामहात्रिपुरसुन्दरी०

४ ह्रीं क्लीं सौः अष्टदलपद्मात्मक सर्वसंक्षोभणचक्राधिष्ठात्र्यै अनङ्गकुसुमाद्यष्टशक्तिसहित - गुप्ततरयोगिनीमयूखावृत-त्रिपुरसुन्दरीचक्रेश्वरीस्वरूप श्रीललिता०

४ हैं ह्क्लीं ह्सौः चतुर्दशारात्मक - सर्वसौभाग्यदायकचक्राधिष्ठात्र्यै सर्वसंक्षोभिण्यादि चतुर्दशशक्तिसहित-संप्रदाययोगिनीमयूखावृत-त्रिपुरवासिनीचक्रेश्वरीस्वरूप श्रीललिता०

४ ह्सैं ह्स्क्लीं ह्स्सौः बहिर्दशारात्मक सर्वार्थसाधकचक्रा - धिष्ठात्र्यै सर्वसिद्धिप्रदादिदशशक्तिसहित कुळोत्तीर्णयोगिनी मयूखावृत त्रिपुराश्रीचक्रेश्वरीस्वरूप श्रीललिता०

४ ह्रीं क्लीं ब्लें अन्तर्दशारात्मक - सर्वरक्षाकरचक्राधिष्ठात्र्यै सर्वज्ञादि दशशक्तिसहित - निगर्भयोगिनीमयूखावृत त्रिपुर-मालिनीचक्रेश्वरीस्वरूप श्रीललिता०

४ ह्रीं श्रां सौः अष्टारात्मकसर्वरोगहरचक्राधिष्ठितवशिन्याद्यष्ट-शक्तिसहित - रहस्ययोगिनीमयूखावृतत्रिपुरासिद्धाचक्रेश्वरीस्वरूप श्रीललिता०

४ ह्स्रैं ह्स्क्लरीं ह्स्रौः त्रिकोणात्मक सर्वसिद्धिप्रदचक्राधि-ष्ठित - कामेश्वर्यादि त्रिशक्तिसहितातिरहस्ययोगिनीमयूखा - वृतत्रिपुराम्बाचक्रेश्वरीस्वरूप श्रीललिता०

४ पञ्चदशी बिन्द्वात्मकसर्वानन्दमयचक्राधिष्ठित - षडङ्गायुध-दशशक्तिसहित - परापरातिरहस्ययोगिनीमयूखावृत महा - त्रिपुरसुन्दरीचक्रेश्वरीस्वरूप श्रीललिता०

लयाङ्गाद्यावरणान्तपूजास्थाने नमोऽन्तशुद्धशक्तिखड्ग-माला-र्चनमपि कर्तुं शक्यम् ।

दण्डनाथानामानि ।

ओं पञ्चम्यै	नमः	ओं पोत्रिण्यै	नमः
दण्डनाथायै	,,	शिवायै	,,
संकेतायै	,,	वार्ताळ्यै	,,
समयेश्वर्यै	,,	महासेनायै	,,
समयसंकेतायै	,,	आज्ञाचक्रेश्वर्यै	,,
वाराह्यै	,,	अरिघ्न्यै	,,

मन्त्रिणीनामानि ।

ओं संगीतयोगिन्यै	नमः	ओं वीणावत्यै	नमः
श्यामायै	,,	वैणिक्यै	,,
श्यामळायै	,,	मुद्रिण्यै	,,
मन्त्रनायिकायै	,,	प्रियकप्रियायै	,,
मन्त्रिण्यै	,,	नीपप्रियायै	,,
सचिवेशान्यै	,,	कदम्बेश्यै	,,
प्रधानेश्यै	,,	कदम्बवनवासिन्यै	,,
शुकप्रियायै	,,	सदामदायै	,,

ललितानामानि ।

ओं सिंहासनेश्यै	नमः	ओं महात्रिपुरसुन्दर्यै	नमः
ललितायै	,,	सुन्दरीचक्रनाथायै	,,
महाराज्ञ्यै	,,	सम्राज्ञ्यै	,,
वराङ्कुशायै	,,	चक्रिण्यै	,,
चापिन्यै	,,	चक्रेश्वर्यै	,,
त्रिपुरायै	,,	महादेव्यै	,,

ओं कामेश्यै	नमः	ओं शिवायै	नमः
परमेश्वर्यै	,,	अनङ्गवल्लभायै	,,
कामराजप्रियायै	,,	सर्वपाटलायै	,,
कामकोटिकायै	,,	कुलनाथायै	,,
चक्रवर्तिन्यै	,,	आम्नायनाथायै	,,
महाविद्यायै	,,	सर्वाम्नायनिवासिन्यै	,,

ओं शृङ्गारनायिकायै नमः ।।

अथ यथावकाशं सहस्रनामावल्यादिना अर्चनं कुर्यात्

धूपः ।

४ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्त्व देवानामसि सस्नितमं पप्रितम जुष्टतमं वह्नितमं देवहूतममहूतमसि हविर्धानं दृंहस्व माह्वामित्रस्य त्वा चक्षुषा प्रेक्षे माभेर्मा संविक्था मा त्वा हिंसिषम् ।।

ओं श्रीललितामहात्रिपुरसुन्दर्यै नमः । धूपमाघ्रापयामि । धूपानन्तरं आचमनीयं समर्पयामि ।।

दीपः ।

४ उद्दीप्यस्व जातवेदोपघ्नन्निर्ऋतिं मम । पशूंश्च मह्यमावह जीवनं च दिशो दिश । मा नो हिंसीर्जातवेदो गामश्वं पुरुषं जगत् । अविभ्रदग्न आगहि श्रिया मा परिपातय ।।

ओं श्रीललितामहात्रिपुरसुन्दर्यै नमः । दीपं दर्शयामि । दीपानन्तर आचमनीयं समर्पयामि ।।

ततः सर्वसंक्षोभिण्यादिमुद्राः प्रदर्शयेत् ।

नैवेद्यम् ।

श्रीदेव्यग्रे चतुरश्रमण्डलं सामान्यर्घ्योदकेन विधाय तत्र आधारोपरि नैवेद्यं निधाय मूलेन प्रोक्ष्य—

४ वं - इति धेनुमुद्रया अमृतीकृत्य—

४ मूलेन त्रिवारमभिमन्त्र्य—

ओं भूर्भुवस्सुवः + परिषिञ्चामि ।

अमृतोपस्तरणमसि—इति देव्यै आपोशनं दत्त्वा वामकरेण ग्रासमुद्रां प्रदर्शयन्, दक्षकरेण प्राणादिपञ्चमुद्राप्रदर्शनपूर्वकं पञ्च प्राणाहुतीः कल्पयेत् । यथा—

४ **ऐं प्राणाय स्वाहा ।** ४ **क्लीं अपानाय स्वाहा ।**

४ **सौः व्यानाय स्वाहा** ४ **ऐं क्लीं उदानाय स्वाहा ।**

४ **ऐं क्लीं सौः समानाय स्वाहा ।** ४ **ब्रह्मणे स्वाहा ।**

४ **चित्पात्रे सद्धविस्सौख्यं विविधानेकभक्षणम् ।**

निवेदयामि ते देवि सानुगायै जुषाण तत् ।।

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवँ रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ।।

इति पुष्पाञ्जलिं विन्यस्य नैवेद्यजातं तादात्म्येन समर्पयेत् ।

४ श्रीललितायै अमृतपानीयं समर्पयामि ।

४ अमृतापिधानमसि । इत्युत्तरापोशनं दत्त्वा—

४ श्रीललितायै हस्तप्रक्षाळनं, गण्डूषं, पादप्रक्षालनं, आचमनीयं, कल्पयामि नमः ।

ताम्रबलिपात्रे निवेदनसामग्रीः किंचित्किंचिदादाय निवेदन-पात्राणि निर्गमय्य तत्स्थलं अस्त्रेण शोधयेत् ।

ताम्बूल—४ वनस्पतिदेवत्याय ताम्बूलाय नमः ।

इति सामान्यार्घ्योदकेन प्रोक्ष्य—

४ तमालदलकर्पूरपूगभागसमन्वितम् ।
एलापत्रसुसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।।

४ श्रीललितायै ताम्बूलं कल्पयामि नमः ।।

४ ,, आनन्दोल्लासविलासहासं
कल्पयामि नमः ।।

।। कर्पूरनीराजनम् ।।

४ साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठिकं राज्यं महाराज्यमाधिपत्यम् ।। ४ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ।।

४ राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । समेकामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ।।

४ श्रीललितायै कर्पूरनीराजनं कल्पयामि नमः ।।

।। मन्त्रपुष्पम् ।।

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।

शिवे शिवसुशीतलामृततरङ्गगन्धोल्लस-
न्नवावरणदेवते नव नवामृतस्यन्दिनी ।
गुरुक्रमपुरस्कृते गुणशरीरनित्योज्ज्वले
षडङ्गपरिवारिते कलित एष पुष्पाञ्जलिः ।।

ीललितामहात्रिपुरसुन्दर्यै नमः पुष्पाञ्जलिं समर्पयामि ।।

४ श्रीललितायै छत्रं कल्पयामि नमः ।

,, चामरयुगलं ,, ,,

,, दर्पणं ,, ,,

,, तालवृन्तं ,, ,,

—o—

बलिदानम् ।

देव्या दक्षभागे सामान्यर्घ्योदकेन त्रिकोण वृत्त-चतुरश्रात्मकं मण्डलं परिकल्प्य—

४ ऐं व्यापकमण्डलाय नमः—इति गन्धाक्षतैरभ्यर्च्य-अर्धभक्तपूरितोदकं बलिपात्रं तत्र विन्यस्य—

४ ओं ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा—

इति मन्त्रं त्रिः पठित्वा दक्षकरार्पितम् वामकरतत्त्वमुद्रास्पृष्टं सलिलं बल्युपरि दत्त्वा वामपार्ष्णिघातकरास्फोटौ कुर्वाणः समुदञ्चितवक्त्रो बाणमुद्रया बलिं भूतैर्ग्रासितं विभाव्य योनिमुद्रया प्रणमेत् ।।

ततः पादौ प्रक्षाळ्य प्रदक्षिणनमस्कारं कृत्वा यथाशक्ति जपमाचरेत् ।।

गुह्यातिगुह्यगोप्त्रि त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ।।

इति जपं समर्पयेत् ।।

स्तोत्रम् ।

४ गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकां पीठरूपिणीम् ।। १ ।।
प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहल्लोहलोल्लोल-कलनाशमकारिणीम् ।। २ ।।

यदक्षरैकमात्रेऽपि संसिद्धे स्पर्धते नरः ।
रविताक्ष्यैन्दुकन्दर्पशंकरानलविष्णुभिः ।। ३ ।।

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ।। ४ ।।

यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ।। ५ ।।

यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ।। ६ ।।

अकचादिटतोन्नद्धपयशाक्षरवर्गिणीम् ।
ज्येष्ठाङ्गबाहुपादाग्रमध्यस्वान्तनिवासिनीम् ।। ७ ।।

तामीकाराक्षरोद्धारां सारात्सारां परात्पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ।। ८ ।।

अद्यापि यस्या जानन्ति न मनागपि देवताः ।
केयं कस्मात् क्व केनेति सरूपारूपभावनाम् ।। ९ ।।

वन्दे तामहमक्षय्यां क्षकाराक्षररूपिणीम् ।
देवीं कुलकलोल्लासप्रोल्लसन्तीं परां शिवाम् ।। १० ।।

वर्गानुक्रमयोगेण यस्यां मात्रष्टकं स्थितम् ।
वन्दे तामष्टवर्गोत्थमहासिद्धचष्टकेश्वरीम् ।। ११ ।।

कामपूर्णजकाराख्य श्रीपीठान्तर्निवासनीम् ।
चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ।। १२ ।।

इति द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिकृत् ।
देव्यास्त्वखण्डरूपायाः स्तवनं तव तद्यतः ।।

जपो जल्पः शिल्पं सकलमपि मुद्राविरचना
गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ।
प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा
सपर्यापर्यायस्तव भवतु यन्मे विलसितम् ।।

षडङ्गदेवता नित्या दिव्याद्योधत्रयीगुरून् ।
नमाम्यायुधदेवीश्च शक्तीश्चावरणस्थिताः ।।

अमुकानन्दनाथाय मम श्रीगुरवे नमः ।
अमुकानन्दनाथाय गुरवे परमाय मे ।।

अमुकानन्दनाथाय गुरवे परमेष्ठिने ।
यदिदं श्रीगुरुस्तोत्रं स्वस्वरूपोपलक्षणम् ।।

बालभावानुसारेण ममेदं हि विचेष्टितम् ।
मातृवात्सल्यसदृशं त्वया देवि विधीयताम् ।।

एवमादिभिः स्तुतिभिर्देवीं स्तुत्यात् ।।

पूजासमर्पण देवतोद्वासने ।

साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं कृपया देवि गृहाणाराधनं मम ।।

इति देव्या वामहस्ते पूजां समर्प्य, शङ्खमुद्धृत्य, देव्युपरि त्रिः परिभ्राम्य, तज्जलं हस्ते समादाय, सामयिकनात्मानं च मूलेन प्रोक्ष्य, शङ्खं प्रक्षाल्य निदध्यात् ।

ततो मूलेन तीर्थनिर्माल्ये स्वीकृत्य—

४ ज्ञानतोऽज्ञानतो वापि यन्मयाचरितं शिवे ।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि ।।

इति क्षमाप्य खेचरीं बद्ध्वा—

४ हृत्पद्मकर्णिकामध्ये शिवेन सह शङ्करि ।
प्रविश त्वं महादेवि सर्वैरावरणैः सह ।।

इति तेजोरूपेण परिणतां श्रीदेवीं पूर्ववत् हृदयं नीत्वा, तत्र च मूर्तिं पञ्चोपचारैः संपूज्य, पुनः आत्मामिन्नसंविद्रूपेण भावयेत् ।

शान्तिस्तवः ।

४ संपूजकानां परिपालकानां
यतेन्द्रियाणां च तपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञां
करोतु शान्तिं भगवान् कुलेशः ।।

नन्दन्तु साधककुलान्यणिमादिसिद्धाः
शापाः पतन्तु समयद्विषि योगिनीनाम् ।
सा शाम्भवी स्फुरतु कापि ममाप्यवस्था
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम् ।।

शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादि शिवान्तं च जगद्यज्ञेन तृप्यतु ।।

इति पूजाप्रकरणं समाप्तम् ।

———

श्रीगौरी अष्टोत्तर शतं

ॐह्रीं महामनोन्मनी शक्त्यै नमः
ॐह्रीं शिवशक्त्यै नमः
ॐह्रीं शिवङ्कर्यै नमः
ॐह्रीं इच्छाशक्तिक्रियाशक्ति ज्ञानशक्तिस्वरूपिण्यै नमः
ॐह्रीं शान्त्यातीतकलानन्दायै नमः
ॐह्रीं शिवमायायै नमः
ॐह्रीं शिवप्रियायै नमः
ॐह्रीं सर्वज्ञायै नमः
ॐह्रीं सुन्दर्यै नमः
ॐह्रीं सौम्यायै नमः १०
ॐह्रीं सच्चिदानन्दरूपिण्यै नमः
ॐह्रीं परापरमय्यै नमः
ॐह्रीं बालायै नमः
ॐह्रीं त्रिपुरायै नमः
ॐह्रीं कुण्डल्यै नमः
ॐह्रीं शिवायै नमः
ॐह्रीं रुद्राण्यै नमः
ॐह्रीं विजयायै नमः
ॐह्रीं सर्वायै नमः
ॐह्रीं शर्वाण्यै नमः २०
ॐह्रीं भुवनेश्वर्यै नमः
ॐह्रीं कल्याण्यै नमः
ॐह्रीं शूलिन्यै नमः
ॐह्रीं कान्तायै नमः
ॐह्रीं महात्रिपुरसुन्दर्यै नमः
ॐह्रीं मालिन्यै नमः
ॐह्रीं मानिन्यै नमः
ॐह्रीं मदनोल्लासमोहिन्यै नमः
ॐह्रीं महेश्वर्यै नमः
ॐह्रीं मातङ्ग्यै नमः ३०
ॐह्रीं शिवकाम्यै नमः
ॐह्रीं चिदात्मिकायै नमः
ॐह्रीं कामाक्ष्यै नमः
ॐह्रीं कमलाक्ष्यै नमः
ॐह्रीं मीनाक्ष्यै नमः
ॐह्रीं सर्वसाक्षिण्यै नमः
ॐह्रीं उमादेव्यै नमः
ॐह्रीं महाकाळ्यै नमः
ॐह्रीं सामायै नमः
ॐह्रीं सर्वज्ञप्रियायै नमः ४०
ॐह्रीं चित्पुरायै नमः
ॐह्रीं चिद्घनानन्दायै नमः
ॐह्रीं चिन्मय्यै नमः
ॐह्रीं चित्स्वरूपिण्यै नमः
ॐह्रीं महासरस्वत्यै नमः
ॐह्रीं दुर्गायै नमः
ॐह्रीं ज्वालादुर्गादिमोहिन्यै नमः
ॐह्रीं नकुल्यै नमः
ॐह्रीं शुद्धविद्यायै नमः
ॐह्रीं सच्चिदानन्दविग्रहायै नमः ५०
ॐह्रीं सुप्रभायै नमः

ॐह्रीं सप्रभाज्वालायै नमः
ॐह्रीं इन्द्राक्ष्यै नमः
ॐह्रीं सर्वमोहिन्यै नमः
ॐह्रीं महेन्द्रजालमध्यस्थायै नमः
ॐह्रीं मायायै नमः
ॐह्रीं मायाविनोदिन्यै नमः
ॐह्रीं विश्वेश्वर्यै नमः
ॐह्रीं वृषारूढायै नमः
ॐह्रीं विद्याजालविनोदिन्यैनमः६०
ॐह्रीं मन्त्रेश्वर्यै नमः
ॐह्रीं महालक्ष्म्यै नमः
ॐह्रीं महाकालीबलप्रदायै नमः
ॐह्रीं चतुर्वेदविशेषज्ञायै नमः
ॐह्रीं सावित्र्यै नमः
ॐह्रीं सर्वदेवतायै नमः
ॐह्रीं महेन्द्राण्यै नमः
ॐह्रीं गणाध्यक्षायै नमः
ॐह्रीं महाभैरवपूजितायै नमः
ॐह्रीं महामायायै नमः ७०
ॐह्रीं महाघोरायै नमः
ॐह्रीं महादेव्यै नमः
ॐह्रीं मलापहायै नमः
ॐह्रीं महिषासुरसंहार्यै नमः
ॐह्रीं चण्डमुण्डकुलान्तकायैनमः
ॐह्रीं चक्रेश्वर्यै नमः
ॐह्रीं चतुर्वेद्यै नमः
ॐह्रीं सर्वदायै नमः
ॐह्रीं सुरनायिकायै नमः
ॐह्रीं षड् शास्त्रनिपुणायैनमः ८०
ॐह्रीं नित्यायै नमः
ॐह्रीं षड्दर्शनविचक्षणायै नमः
ॐह्रीं कालरात्र्यै नमः
ॐह्रीं कलातीतायै नमः
ॐह्रीं कविराजमनोहरायै नमः
ॐह्रीं शारदातिलकाधारायै नमः
ॐह्रीं धीरायै नमः
ॐह्रीं धीरजनप्रियायै नमः
ॐह्रीं उग्रमार्यै नमः
ॐह्रीं महामार्यै नमः ९०
ॐह्रीं क्षिप्रमार्यै नमः
ॐह्रीं रणप्रियायै नमः
ॐह्रीं अन्नपूर्णेश्वर्यै नमः
ॐह्रीं मात्रे नमः
ॐह्रीं स्वर्णाकारतटित्प्रभायै नमः
ॐह्रीं स्वरव्यञ्जनवर्णोदयायैनमः
ॐह्रीं गद्य पद्यादि कारणायैनमः
ॐह्रीं पद वाक्यार्थनिलयायै नमः
ॐह्रीं बिन्दुनादादिकारणायै नमः
ॐह्रीं मोक्षेश महिष्यै नमः १००
ॐह्रीं सत्यायै नमः
ॐह्रीं भुक्ति मुक्तिफलप्रदायै नमः
ॐह्रीं विज्ञानदायिन्यै नमः
ॐह्रीं प्रज्ञायै नमः
ॐह्रीं प्रज्ञानफलदायिन्यै नमः
ॐह्रीं अहंकार कलातीतायै नमः
ॐह्रीं पराशक्त्यै नमः
ॐह्रीं परात्परायै नमः १०८

।। देव्युपनिषत् ।।

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदा । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।। ॐ शान्तिः शान्तिः शान्तिः ।।

हरिः ॐ सर्वे वै देवा देवीमुपतस्थु । कासि त्वं महादेवी ।। १ ।। साब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगच्छून्यं चाशून्यं च । अहमानन्दानानन्दः । विज्ञानाविज्ञाने अहम् । ब्रह्मा ब्रह्मणी वेदितव्ये । इत्याहाथर्वणी श्रुतिः ।। २ ।। अहं पञ्चभूतान्यपञ्चभूतानि । अहमखिलं जगत् । वेदोऽहमवेदोऽहम् । विद्याहमविद्याहम् । अजाहमनजाहम् । अधश्चोर्ध्वं च तिर्यक्चाहम् ।। ३ ।। अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणावुभा बिभर्म्यहमिन्द्राग्नी अहमश्विनावुभौ ।। ४ । अह सोमं त्वष्टारं पूषणं भग दधाम्यहम् । विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ।। ५ अह दधामि द्रविणं हविष्मते सुप्राव्ये ३ ये यजमानाय सुन्वते । अहं राष्ट्री सङ्गमनी वसूनामह सूवे पितरमस्य मूर्धन् ।। ६ ।। मम योनिरप्स्वन्तः समुद्रे । य एवं वेद स देवीपदमाप्नोति ।। ७ ।। ते देवा अब्रुवन् । नमो देव्यै महादेव्यै शिवायै सतत नमः । नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।। ८ ।। तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीं शरणमहं प्रपद्ये सुतरां नाशय ते तमः ।। ९ ।। देवीं वाचमज-

नयन्त देवास्तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ।। १० ।। कालरात्रिं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् । सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम् ।। ११ ।। महालक्ष्मीश्च विद्महे सर्वसिद्धिश्च धीमहि । तन्नो देवी प्रचोदयात् ।। १२ ।। अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ।। १३ ।। कामो योनिः कामकला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा सकला मायया च पुरुच्येषा विश्वमातादिविद्योम् ।। १४ ।। एषात्मशक्तिः । एषा विश्वमोहिनी पाशाङ्कुशधनुर्बाणधरा । एषा श्रीमहविद्या ।। १५ ।। य एवं वेद स शोकं तरति ।। १६ ।। नमस्ते अस्तु भगवति भवति मातरस्मान्यातु सर्वतः ।। १७ ।। सैषाष्टौ वसवः । सेषैकादश रुद्राः । सैषा द्वादशादित्याः । सैषा विश्वेदेवाः सोमपा असोमपाश्च । सैषा यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः । सैषा सत्त्वरजस्तमांसि सैषा प्रजापतीन्द्रमनवः । सैषा ग्रहनक्षत्रज्योतींषि कलाकाष्ठादिकालरूपिणी । तामहं प्रणौमि नित्यम् ।।१८।। तापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीम् । अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम् ।।१९।। वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम् । अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम् ।। २० ।। एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः । ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः ।। २१ ।। वाङ्माया ब्रह्मभूस्तस्मात्षष्ठं वक्त्रसमन्वितम् । सूर्यो वामश्रोत्रबिन्दुसंयुक्तष्टात्तृतीयकः ।। २२ ।। नारायणेन संयुक्तो वायुश्चाधरयुक्ततः । विच्चेनबार्णकोऽणुः स्यान्महदानन्ददायकः ।। २३ ।। हृत्पुण्डरीकमध्यस्थां प्रातः सूर्यसमप्रभाम् । पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम् ।

त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे ।। २४ ।। नमामि त्वामहं देवीं महाभयविनाशिनीम् । महादुर्गप्रशमनीं महाकारुण्यरूपिणीम् ।। २५ ।। यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यतेऽज्ञेया । यस्या अन्तो न विद्यते तस्मादुच्यतेऽनन्ता । यस्या ग्रहणं नोपलभ्यते तस्मादुच्यतेऽलक्ष्या । यस्या जननं नोपलभ्यते तस्मादुच्यतेऽजा । एकैव सर्वत्र वर्तते तस्मादुच्यत एका । एकैव विश्वरूपिणी तस्मादुच्यते नैका । अत एवोच्यतेऽज्ञेयानन्तालक्ष्याजैका नैकेति ।। २६ ।। मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी । ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी ।। २७ ।। यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता । [दुर्गात्संत्रायते यस्माद्देवी दुर्गेति कथ्यते । प्रपद्ये शरणं देवीं दुंदुर्गे दुरितं हर ।।] तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् । नमामि भवभीतोऽहं संसारार्णवतारिणीम् ।। २८ ।। इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमवाप्नोति । इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति शतलक्षं प्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति ।। २९ ।। शतमष्टोत्तरं चास्याः पुरश्चर्याविधिः स्मृतः ।। ३० ।। दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते । महादुर्गाणि तरति महादेव्याः प्रसादतः ।। ३१ ।। सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानोऽपापो भवति । निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवति । नूतनप्रतिमायां जप्त्वा देवतासांनिध्यं भवति । प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति । भौमाश्विन्यां महादेवीसंनिधौ जप्त्वा महामृत्युं तरति । य एवं वेदेत्युपनिषत् ।। ३२ ।।

।। त्रिपुरोपनिषत् ।।

ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठित-माविरावीर्म एधि वेदस्य म आणीस्थः श्रुत मे मा प्रहासिरनेना-धीतेनाहोरात्रान्त्संदधाम्यृतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारमवतु वक्तारम् ।। ॐ शान्तिः शान्तिः शान्तिः ।।

ॐ तिस्रः पुरस्त्रिपथा विश्वचर्षणी अत्राकथा अक्षरा संनिविष्टा । अधिष्ठायैनामजरा पुराणी महत्तरा महिमा देवता नाम् ।। १ ।। नवयोनीर्नव चक्राणि दीधिरे नवैव योगा नव योगिनीश्च । नवानां चक्रे अधिनाथाः स्योना नव मुद्रा नव भद्रा महीनाम् ।। २ ।। एका सा आसीत्प्रथमा सा नवासी-दासोनविंशदासोनत्रिंशत् चत्वारिंशदथ तिस्रः समिधा उश-तीरिव मातरो मा विशन्तु ।। ३ ।। ऊर्ध्वज्वलज्ज्वलनज्यो-तिरग्रेस्तमो वै तिरश्चीनमजरं तद्रजोऽभूत् । आनन्दनं मोदनं ज्योतिरिन्दोरेता उ वै मण्डला मण्डयन्ति ।। ४ ।। तिस्रश्च रेखाः सदनानि भूमेस्त्रिविष्टपास्त्रिगुणास्त्रिप्रकाशा । एतत्पुरं पूरकं पूरकाणामत्र प्रथेते मदनो मदन्या ।। ५ ।। मदन्तिका मानिनी मङ्गला च सुभगा च सा सुन्दरी शुद्धमत्ता । लज्जा मतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालयन्ती ।। ६ ।। इमां विज्ञाय सुधया मदन्ति परिस्रुता तर्पयन्तः स्वपीठम् । नाकस्य पृष्ठे महतो वसन्ति परं धाम त्रैपुरं चाविशन्ति ।। ७ ।। कामो योनिः कमला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः । पुनर्गुहा सकला मायया च पुरूच्देषा विश्वमातादिविद्या ।। ८ ।। षष्ठं सप्तममथ वह्निसारथिमस्या मूलत्रिकमादेशयन्तः । कथ्यं

कविं कल्पकं काममीशं तुष्टुवांसो अमृतत्त्वं भजन्ते ।। ९ ।।
त्रिविष्टपं त्रिमुखं विश्वमातुर्नव रेखाः स्वरमध्यं तदीळे । बृह-
त्तिथीर्दश पञ्चादि नित्या सा षोडशी पुरमध्यं बिभर्ति ।। १० ।।
द्वा मण्डला द्वा स्तना बिम्बमेकं मुखं चाधस्त्रीणि गुहा सद-
नानि । कामीं कलां काम्यरूपां विदित्वा नरो जायते काम-
रूपश्च काम्यः ।। ११ ।। ।। परिस्रुतं झषमाद्यं पलं च भक्तानि
योनीः सुपरिष्कृतानि । निवेदयन्देवतायै महत्यै स्वात्मीकृत्य
सुकृती सिद्धिमेति ।। १२ ।। सृण्येव सितया विश्वचर्षणिः
पाशेन प्रतिबध्नात्यभीकान् । इषुभिः पञ्चभिर्धनुषा च विध्य-
त्यादिशक्तिररुणा विश्वजन्या ।। १३ ।। भगः शक्तिर्भगवान्काम
ईश उभा दातारविह सौभगानाम् । समप्रधानौ समसत्त्वौ
समोतयोः समशक्तिरजरा विश्वयोनिः ।। १४ ।। परिस्रुता हविषा
पावितेन प्र सकोचे गलिते वै मनस्तः । सर्वः सर्वस्य जगतो
विधाता धर्ता हर्ता विश्वरूपत्वमेति ।। १५ ।। इयं महोपनिष-
त्त्रिपुराया यामक्षरं परमे गीर्भिरीट्टे । एषर्ग्यजुः परमेतच्च
सामेवायमथर्वेयमन्या च विद्योम् ।। १६ ।। एवं वेहेत्युपनिषत् ।।

ॐ वाङ्मे मनसीति शान्तिः ।। हरिः ओं तत्सत् ।

।। इति त्रिपुरोपनिषत् ।।

———

श्रीचक्रोपनिषत्

ॐ अथाह वै श्रीचक्रे नित्याक्रान्ते ।
गौरीर्मियाय सलिलान तक्षत्यकपदा द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥

इति प्रत्यहं ससङ्गति सहस्रं कलशान् स्थाप्य शतं वा नव वा सर्वाभावे पूर्णाभिषेकं चरेत् । अष्टाष्टकं चरेत् । पञ्चपञ्चकं वा चरेत् । सर्वाभावे शतं पूजयेत् । अमृतत्वं गच्छति । श्रीचक्रन्यासं चरेत् । स व्यापकत्वं गच्छति । मूलाधाराद्विलान्तं क्रमेण न्यसेत् । स्वराट्चक्रं विराट्चक्रं सम्राट्चक्रं विराज्यचक्रं विश्वरूपचक्रं शत्रुजिच्चक्रं क्रमेण सप्तकलामयं न्यसेत् । स शिवो भवेत् । स कविर्भवेत् । स सर्वसिद्धीश्वरो भवेत् । स नवनाथाधिष्ठितो भवेत् । स भुवनाराधितो भवेत् । निर्विकल्पेन मनसा यश्चरेच्छक्तिदेहे स कालीरूपो भवेत् । विना शक्तिं न मोक्षो न ज्ञानं न सत्यं न धर्मो न तपो न हरिर्न हरो न विरिञ्चिः । सर्वं शक्तियुक्तं भवेत् । तत्संयोगात् सिद्धीश्वरो भवेत् । इति शिवम् ॥

॥ बह्वृचोपनिषत् ॥

ओं वाङ्मे मनसीति शान्तिः ॥

हरिः ॐ । देवी ह्येकाग्र एवासीत् । सैव जगदण्डमसृजत् । कामकलेति विज्ञायते । शृङ्गारकलेति विज्ञायते । तस्या एव ब्रह्मा अजीजनत् । विष्णुरजीजनत् । रुद्रोऽजीजनत् । सर्वे मरुद्गणा अजीजनन् । गन्धर्वाप्सरसः किंनरा वादित्रवादिनः समन्तादजीजनन् । भोग्यमजीजनत् । सर्वमजीजनत् । सर्वं शाक्तमजीजनत् । अण्डजं स्वेदजमुद्भिज्जं जरायुजं यत्किंचैतत्प्राणि स्थावरजङ्गमं मनुष्यमजीजनत् ॥

सैषा परा शक्तिः । सैषा शांभवी विद्या कादिविद्येति वा हादिविद्येति वा सादिविद्येति वा । रहस्यमोमों वाचि प्रतिष्ठा । सैव पुरत्रयं शरीरत्रयं व्याप्य बहिरन्तरवभासयन्ती देशकालवस्त्वन्तरासङ्गान्महात्रिपुरसुन्दरी वै प्रत्यक् चितिः । सैवात्मा ततोऽन्यदसत्यमनात्मा । अत एषा ब्रह्मसवित्तिभावाभावकलाविनिर्मुक्ता चिद्विद्याऽद्वितीयब्रह्मसंवित्तिः सच्चिदानन्दलहरी महात्रिपुरसुन्दरी बहिरन्तरनुप्रविश्य स्वयमेकैव विभाति । यदस्ति सन्मात्रम् । यद्विभाति चिन्मात्रम् । यत्प्रियमानन्दं तदेतत्पूर्वाकारा महात्रिपुरसुन्दरी । त्वं चाहं च सर्वं विश्वं सर्वदेवता । इतरत्सर्वं महात्रिपुरसुन्दरी । सत्यमेकं ललिताख्यं वस्तु तदद्वितीयमखण्डार्थं परं ब्रह्म । पञ्चरूपपरित्यागादर्वरूपप्रहाणतः । अधिष्ठान परं तत्त्वमेकं सच्छिष्यते महत् ।। इति ।। प्रज्ञानं ब्रह्मेति वा अहं ब्रह्मास्मीति वा भाष्यते । तत्त्वमसीत्येव संभाष्यते । अयमात्मा ब्रह्मेति वा ब्रह्मैवाहमस्मीति वा योऽहमस्मीति वा सोहमस्मीति वा योऽसौ सोऽहमस्मीति वा या भाव्यते सैषा षोडशी श्रीविद्या पञ्चदशाक्षरी श्रीमहात्रिपुरसुन्दरी बालाम्बिकेति बगलेति वा मातङ्गीति स्वयंवरकल्याणीति भुवनेश्वरीति चामुण्डेति चण्डेति । वाराहीति तिरस्करिणीति राजमातङ्गीति वा शुकश्यामलेति वा लघुश्यामलेति वा अश्वारूढेति वा प्रत्यङ्गिरां धूमावती सावित्री गायत्री सरस्वती ब्रह्मानन्दकलेति । ऋचो अक्षरे परमे व्योमन् । यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासते ।। इत्युपनिषत् ।। ओं वाङ्मे मनसीति शान्तिः ।। हरिः ओं तत्सत् ।।

।। इति बहूवृचोपनिषत् ।।

॥ गुरुपादुकापञ्चकम् ॥

ब्रह्मरन्ध्रसरसीरुहोदरे नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं द्वादशार्णसरसीरुहं भजे ॥ १ ॥

तस्य कन्दलितकर्णिकापुटे क्लृप्तरेखमकथादिरेखया ।
कोणलक्षितहळक्षमण्डलीभावलक्ष्यमबलालयं भजे ॥ २ ॥

तत्पुटे पटुतटित्कडारिमस्पर्धमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपुर्नादबिन्दुमणिपीठमण्डलम् ॥ ३ ॥

ऊर्ध्वमस्य हुतभुक्शिखात्रयं तद्विलासपरिबृंहणास्पदम् ।
विश्वघस्मरमहोच्छिदोत्कटं व्यामृशामि युगमादिहंसयोः ॥ ४ ॥

तत्र नाथचरणारविन्दयोः कुङ्कुमासवझरीमरन्दयोः ।
द्वन्द्वमिन्दुमकरन्दशीतलं मानसं स्मरति मङ्गळास्पदम् ॥ ५ ॥

निषक्तमणिपादुकानियमिताघकोलाहलं
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रकम् ।
परामृतसरोवरोदितसरोजसद्रोचिषं
भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम् ॥ ६ ॥

पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम् ।
षडाम्नायफलप्राप्तं प्रपञ्चे चातिदुर्लभम् ॥ ७ ॥